# Shri Yamunashtakam 6

# શ્રીયમુનાષ્ટકમ્ ૬

## Document Information

Text title : yamunAShTakam 6

File name : yamunAShTakam6.itx

Category : devii, nadI, aShTaka, devI

Location : doc_devii

Author : nandakishoragosvAmi

Proofread by : NA

Latest update : January 15, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# Shri Yamunashtakam 6

## શ્રીયમુનાષ્ટકમ્ ૬

મદ-કલકલ-કલબિઙ્ક-કુલાકુલ-કોક-કુતૂહલ-નીરે
    તરુણ-તમાલ-વિશાલ-રસાલ-પલાશ-વિલાસ-સુતીરે ।
તરલ-તુષાર-તરઙ્ગ-વિહાર-વિલોલિત-નીરજ-નાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૧॥

લલિત-કદમ્બ-કદમ્બ-નિતમ્બ-મયૂર-મનોહર-નાદે
    નિજ-જલ-સઙ્ગિત-શીતલ-મારુત-સેવિત-પાદપ-પાદે ।
વિકસિત-સિત-શતપત્ર-લસદ્-ગમનાઞ્ચિત-મત્ત-મરાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૨॥

રાધા-રમણ-ચરણ-શરણાગતિ-જીવન-જીવન-વાહે
    બહુતર-સઞ્ચિત-પાપ-વિદારણ-દૂરીકૃત-ભવ-દાહે ।
વિધિ-વિસ્માપક-દુર્જન-તાપક-નિજ-તેજો-જિત-કાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૩॥

અમર-નિકર-વર-વાગ્-અભિનન્દિત-હરિ-જલ-કેલિ-વિલાસે
    નિજ-તટ-વાસિ-મનોરથ-પૂરણ-કૃત-સુરતરુ-પરિહાસે ।
સ્નાન-વિમર્દિત-હરિ-પદ-કુઙ્કુમ-પઙ્ક-કલઙ્કિત-ભાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૪॥

અમલ-કમલ-કુલ-દલ-ચલ-મધુકર-નિનદ-પ્રતિધ્વનિ-શોભે
    સ્વ-સલિલ-શીકર-સેવક-નર-વર-સમુદિત-હરિ-પદ-લોભે ।
સ્વાઙ્ગ-સ્પર્શ-સુખી-કૃત-વાયુ-સમુદ્ધત-જન-પદ-જાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૫॥

મણિ-ગણ-મૌક્તિક-મઞ્જુલ-માલ-નિબદ્ધ-તટ-દ્વય-ભાસે
    પ્રકર-નિકર-તનુ-ધારિ-સુરેશ્વર-મણ્ડલ-રચિત-નિવાસે ।
વિપુલ-વિશદ-મૃદુ-તલ-પુલિનાવલિ-કમન-ગમન-બક-માલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૬॥

અગણિત-ગુણ-ગણ-સાધન-સમુદય-દુર્લભ-ભક્તિ-તડાગે
    સાનન્દાત્યવગાહન-દાયિનિ માધવ-સમ-તનુ-રાગે ।
રસ-નિધિ-સુખ-વિધિ-કારણ-કેશવ-પાદ-વિમુખ-વિકરાલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૭॥

વ્રજ-નવ-યુવતિ-વિહાર-વિધાયક-કુઞ્જ-પુઞ્જ-કૃત-સેવે
    નિજ-સુષમા-નિચયેન વશીકૃત-ગોકુલ-જીવન-દેવે ।
કૃષ્ણ-ચન્દ્ર-કરુણા-રસ-વાહિનિ-વૃન્દાવન-વન-માલે
    મમ દુરિતં ત્વરિતં હિ વિનાશય નલિનાનન્દક-બાલે ॥ ૮॥

સાર્થક-સુન્દર-પદ-યમકાઞ્ચિત-કરણ-કુતૂહલ-કારં
    પદ્યાષ્ટકમિદમર્ક-સુતા-મહિમામૃત-વર્ણન-ભારમ્ ।
કવિવર-નન્દ-કિશોર-કૃતં શુભ-ભક્તિ-યુતો નર-જાતિઃ
    કોऽપિ પઠેદ્યદિ ગોષ્ઠ-પુરન્દર-ભક્ત-ગણેષુ વિભાતિ ॥ ૯॥

ઇતિ શ્રીનન્દકિશોરગોસ્વામિવિરચિતં શ્રીયમુનાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Yamunashtakam 6*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*